# P.G. 1st Semester - 2018

# SANSKRIT

## Paper : MSNSCCS105

Full Marks : 50 Time : 2 Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## MODULE-I

1. वङ्गभाषया अनुवादः करणीयः : 10

कस्मिंश्चित् जलाशये शतवुद्धिः सहस्रवुद्धिश्च द्वौ मत्स्यौ निवसतः स्म । अथ ताभ्यां साकम् एकवुद्धिः नाम मण्डूको मित्रतां स्थापितवान् । एवं ते त्रयोऽपि जलतीरे सुभाषितगोष्ठीसुखम् अनुभूय भूयोऽपि सलिलं प्रविशन्ति । अथ कदाचित् जालहस्ता धीवराः तस्मिन् जलाशये वेलायां समायाता मिथः प्रोचुः— ''अहो ! बहुमत्स्योऽयं दृश्यते स्वल्पसलिलश्च, तत् प्रभातेऽत्रागमिष्यामः'' एवमुक्ता ते स्वगृहंगताः । अथ मण्डूक आह—भो शतवुद्धेः ! श्रुतं धीवरोक्तं भवता । तत् किमत्र कर्तव्यं पलायनमवस्थानं वा ? तच्छ्रुत्वा सहस्रवुद्धिः प्रहस्य आह—''भो मित्र ! मा भैषीः । त्वां वुद्धिप्रभावेन रक्षयिष्यामि । यतोऽनेकां सलिलगतिचर्चाम् अहं जानामि ।'' ततः शतवुद्धिराह मदीयं पितृपर्यायागतं जन्मस्थानं त्यक्तुं न शक्यते । अतः कदाचिदपि न गन्तव्यम् । ''भद्रौ ! मम



तावत् एकैव वुद्धिः पलायनपरा'' इत्युक्ता तु स मण्डूको रात्रौ सभार्योऽन्यत्र गतः । धीवरैरपि प्रातः आगत्य मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः । तौ अपि शतवुद्धिसहस्त्रवुद्धी जाले पतितौ व्यापादितौ च ।

**अथवा**

पुरा आसीत् रत्नाकरो नाम भयङ्करो दस्युः । स च सर्बदा वनेषु परिभ्रमन् पथिकान् व्यापाद्य तेषां सर्वस्वमपहृत्य च पितरौ भार्यापुत्रादिकं च प्रतिपालयति स्म । अथैकदा देवर्षिं नारदमवलोक्य स लगुडप्रहारेण तं हन्तुमुद्यतः । तदा देवर्षिर्नारद उवाच—''भो किं त्वया न ज्ञातं यदनेन पापानुष्ठानेन घोरे नरके तव स्थानं भविष्यति ? परं येषां कृते एतत्पापं क्रियते तेषामेकतमोऽपि न ते पापभाग् भविष्यतीति । तदा स नारदं रज्जुभिर्बद्धा सन्दिग्धमना निजालयं गतः स्वपरिजनं पृष्टवान् च—''अपि भवन्तो मत्कृतस्य पापस्यांशभाजो भविष्यतीति ?'' परिजना आहुः—'न कथमपि' । अथ रत्नाकुलो भव्यव्याकुलो नारदमुपसृत्य प्रोवाच—''भगवन् ! त्रायस्व मां नरकात्'' । नारद उवाच—''भो रत्नाकर ! यावदहं स्वर्गान्न प्रत्यागच्छामि तावत् त्वमहर्निशं रामनाम जप ।'' अथ रामनामजपेन अतिक्रान्तेषु बहुवर्षेषु रत्नाकरो वल्मीकस्तूपाद् उद्गतो देवलोकप्रत्यागतनारदं प्रणतितर्ति विनिवेदितः । नारदेन च वाल्मीकिरिति नाम्ना अभिहितः सः । ततो रामायणनामकं महाकाव्यं विरच्य जगति ख्यातकीर्तिं स्थापयामास सः ।''



http://www.wbstudy.com

2. সুরগিরা দেবনাগরীলিপ্যা চানুবাদঃ ক্রিয়তাম্ : 10

তখন সূর্য অস্ত গিয়েছিল। ক্রমে রাত্রি হল এবং তিমিরাবৃত কাননে পথিকটি পথ ভুলে গেল। সহসা দূরে একটি আলো দেখে সে সেই দিকে অগ্রসর হল। নিকটে অগ্রসর হয়ে সে একটি ক্ষুদ্র কুটির দেখতে পেল। সে অতিশয় পরিশ্রান্ত। সুতরাং রাত্রিতে বিশ্রামের জন্য একটি স্থানের প্রয়োজন ছিল। তাই সে ঐ কুটিরের দরজার কাছে এসে সেখানে করাঘাত করল। তৎক্ষণাৎ দরজা খুলিল এবং দীপ হস্তে এক নারীকে দেখে সে অত্যন্ত আশ্চর্য্যান্বিত হল। তারপর সেই পথিক সেখানে জ্ঞান হারালেন। যখন তাঁর সংজ্ঞা ফিরল তখন তিনি দেখলেন যে সেই নারী তাঁর শুশ্রূষা করছেন। একদা সেই নারী পথিকের প্রিয়তমা ছিলেন। কিন্তু প্রিয়তম পুরুষ সংসারকে মায়াময় ও অনিত্য জেনে সবকিছু ত্যাগ করে পরিব্রাজক-বেশ ধারণ করে আত্মলাভের নিমিত্ত পর্বত-অরণ্যে ভ্রমণ করছেন।

**অথবা**

বিশ্বে যখন ধর্মের গ্লানি দেখা দেয় তখন ভগবান স্বয়ং নররূপ ধারণ করে সেই গ্লানি দূর করেন। আধুনিক কালে বিশেষতঃ সপ্তদশ ও অষ্টাদশ শতাব্দীতে ভারতবর্ষে ধর্মের যে গ্লানি দেখা দিয়েছিল, তাকে দূরকরার জন্য যিনি বঙ্গে আবির্ভূত হয়েছিলেন, তিনি হলেন ভগবান শ্রীরামকৃষ্ণ। তিনি কৌলিন্যপ্রথা দূর করে সর্বত্র সর্বধর্মের সমন্বয়ের বাণী প্রচার করেছিলেন। তাঁর মত হল—"যত মত তত পথ।" তিনি ১৮৩৬ খ্রীষ্টাব্দে বঙ্গ দেশের হুগলি মণ্ডলের অন্তর্গত



কামারপুকুর নামক গ্রামে জন্মগ্রহণ করেন। তাঁর পিতার নাম ছিল ক্ষুদিরাম চট্টোপাধ্যায়, মায়ের নাম ছিল চন্দ্রামণি দেবী। তিনি বাল্যকাল থেকেই ঈশ্বরের প্রতি অনুরক্ত ছিলেন। তিনি তাঁর ভক্তিরসের মাধ্যমে মৃন্ময়ী মূর্তিকে চিন্ময়ী করে তুলেছিলেন। আর্ত পীড়িত মানুষের দুঃখ দেখে তিনি দুঃখী হতেন। তাই তাদের দুঃখ দূর করার সর্বদা সচেষ্ট হতেন। নররূপী নারায়ণের সেবাই হল প্রকৃত সেবা। কারণ ঈশ্বর সকলের মধ্যে বিরাজ করেন।

## MODULE-II

3. अधस्तात् लघुबन्धं पठित्वा लघुप्रश्नानां सुरगिरा देवनागरीलिप्या च उत्तरं प्रदेयम् :

कश्चन नृपो वानरमाहूय प्रोवाच—भो वानराधिप ! कुत्र त्वया आसादिता एतादृशी बहुमूल्या रत्नमाला ? एवंविधा माला जगति सुदुर्लभा । वानर आहश्रूयताम् । अस्ति कुत्रचिदरण्ये गुप्ततरं महत् सरो धनदनिर्मितम् । तत्र सूर्येऽर्धोदिते रविवासरे यः कश्चित् तत्र निमिज्जति स धनदप्रमादादीदृग्रत्नमाला-विभूषितकण्ठो निःसरति । अथ नृपेण तदाकर्ण्य स वानरः समाहूतः पृष्टश्च—भो वानराधिप ! किं सत्यमेतत् ? तदा कपिराह—स्वामिन् ! मत्कण्ठस्थितया रत्नमालया प्रत्ययन्ते । तद यदि रत्नमालया ते प्रयोजनं तर्हि मया सह कमपि प्रेषय । नूनमसौ त्वदर्थमेवम्विधां रत्नमालामवश्यमानेष्यति । तदा नृपः प्रलुब्धः संजातः । स पुनराह—यदि वान्धवैः सह गच्छामि ? सर्वो हि नूनं प्राप्स्यति मालामिति वानरवाक्यं



http://www.wbstudy.com

श्रुत्वा प्रहृष्टो भूपतिः पुनराह—यद्येवं तदहं सपरिजनः स्वयं तत्र गमिष्यामि ।

i) किमुक्तं वानरं प्रति नृपेण ? 2

ii) रत्नमाला कीदृशी ? 2

iii) केनोपायेन वा सा लभ्यते ? 2

iv) कः सन्देहः नृपस्य ? 2

v) भूपतिः कथं किं स्थिरीकृतवान् ? 2

4. अधोलिखितान् श्लोकान् अधीत्य समेषां प्रश्नानाम् उत्तरं सुरगिरा देवनागरीलिप्या च प्रदेयम् :

i) उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो वन्धुरात्मैव रिपुरात्मनः ॥

क) कथमात्मा वन्धुः शत्रुर्वा भवेत् ? 2

ii) मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥

ख) पण्डितस्य किं लक्षणम् ? 2

iii) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

ग) कथं सहसा किमपि कार्यं न करणीयम् ? 2

iv) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

घ) वेदोऽखिलो धर्ममूलम् इति वचनस्य तात्पर्यं विधेम् । 2



v) क्रियासु युक्तैर्नृप चारचक्षुषो
न बञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥

ङ) कथं हितं मनोहारि च वचनं दुर्लभम् ? 2

5. अधः कस्यचि**देकस्य** प्रबन्धो लेखनीयः : 10

क) स्वाधीनोत्तरकाले संस्कृते वङ्गीयजनानामवदानम् ।

ख) संस्कृतं मम जीवनम् ।

ग) संस्कृतपठनाय कारणम् ।

घ) संस्कृतभाषाया उपयोगित्वम् ।

ङ) अस्माकं विश्वविद्यालयः ।

---



http://www.wbstudy.com